Y8RMZAJ

# सङ्कलनात्मकं मूल्याङ्कनम्
## द्वितीयसत्रम्, 2014
## संस्कृतम् सम्प्रेषणात्मकम्
## कक्षा - दशमी

समय : होरात्रयम् पूर्णाङ्का:90

निर्देशाः

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | 15 अङ्काः |
| खण्डः (ख) रचनात्मक-कार्यम् | - | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | - | 30 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्डः 'क'
### अपठित & अवबोधनम् ( 15 अङ्काः )

1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 10

प्रातः रमा भ्रमणाय निर्गतवती। ग्रामे कुत्रापि प्रातःकालीनत्वरा नास्ति। दिल्लीनगरे तु अस्मिन् काले मार्गे वाहनान्येव दृश्यन्ते। रमया श्रुतम् ग्रामे षटसप्तकन्याः सन्ति, यासां सीवनकलायां रुचिः आसीत् परं शिक्षणार्थं तत्र व्यवस्था नासीत्। ज्ञात्वैव रम्या दिल्लीनगरात् सीवनयन्त्राणि आनीतानि शिक्षणाय च सिंगरकम्पनीमाध्यमेन व्यवस्था कृता। विद्यालयः दूरे आसीत् सर्वे तत्र न गच्छन्ति स्म। पुस्तकालयस्य अभावः आसीत्। अत एव रमया बालपत्रिकाभिः, रामायणमहाभारतपुराणैश्च सह वाचनालयः उद्घाटितः। दैनिकसमाचारपत्राण्यपि आनीतानि। बहूनि क्षेत्राणि रिक्तान्यासन्। अतः रमायाः पत्युः मित्रम् यः 'पूसाइन्स्टीट्यूट' इति संस्थाने वैज्ञानिकोऽस्ति, सः अत्र आगत्य ग्रामवासिभ्यः कृषिसम्बन्धिज्ञानम्, उपकरणानि च अयच्छत्। शीघ्रमेव ग्रामे पंक्तिबद्धा हरीतिमा सर्वत्र दृष्टा। रमायाः

दृढविश्वास: सञ्जात: यत् यदि लक्ष्यं पवित्रमस्ति तर्हि वातावरणं अवसराश्च स्वयमेव अनुकूला: सञ्जायन्ते।

प्रश्ना:

I. एकपदेन उत्तरत।

(i) दिल्लीनगरे प्रात:काले मार्गे कानि दृश्यन्ते ?

(ii) का प्रात: भ्रमणाय निर्गतवती ?

II. पूर्णवाक्येन उत्तरत।

(i) ग्रामे सीवनकला शिक्षणार्थं रमया का व्यवस्था कृता ?

(ii) रमाया: पत्यु: मित्रम् ग्राममागत्य ग्रामवासिभ्य: कानि अयच्छत् ?

III. निर्देशानुसारम् उत्तरत –

(i) 'अनुकूला:' इत्यस्य पदस्य विलोमपदं किम् ?

(अ) व्यवस्था (ब) अभाव:

(स) प्रतिकूला: (द) रिक्तानि

(ii) 'उपकरणानि' इत्यस्य पदस्य पर्यायपदं किम् ?

(अ) यन्त्राणि (ब) क्षेत्राणि

(स) आनीतानि (द) बहूनि

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

2 अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 5

पिबन्ति नद्य: स्वयमेव नाम्भ:

स्वयं न खादन्ति फलानि वृक्षा:

नादन्ति शस्यं खलु वारिवाहाः (मेघ)

परोपकाराय सतां विभूतयः ।।

**प्रश्नाः**

I. **एकपदेन उत्तरत।**

काः स्वयमेव अम्भः न पिबन्ति ?

II. **पूर्णवाक्येन उत्तरत।**

(i) के खलु शस्यं नादन्ति ?

(ii) वृक्षाः किं न कुर्वन्ति ?

III. **निर्देशानुसारम् उत्तरत –**

(i) 'पिबन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) अम्भः (ब) नद्यः

(स) फलानि (द) शस्यम्

(ii) 'मेघाः' इत्यस्य पदस्य पर्यायपदं किम् ?

(अ) वारिवाहाः (ब) गावः

(स) गगनम् (द) जलम्

**खण्डः 'ख'**

**रचनात्मककार्यम् ( 15 अङ्काः )**

3 **स्वरुग्णताया सूचनां दातुं मातरं प्रति लिखिते पुत्रस्य पत्रे रिक्तस्थानानि पूरयत।** 5

छात्रावासात्

तिथिः ________

___(i)___.मातृचरणेषु!

शतशः प्रणतिराशयः।

___(ii)___.कुशली, भवत्याः कुशलाय ___(iii)___.शिवं प्रार्थये। महता खेदेन मया___(iv)___.यत् अस्मिन् वर्षे अहं सम्पूर्णां परीक्षां दातुं न___(v)___.। परीक्षाकाले एव मम स्वास्थ्यम् अशोभनं जातम्। द्वितीयस्य प्रश्नपत्रस्य परीक्षां दत्त्वा यदा अहं छात्रावासम् आगतवान् तदा मम___(vi)___.महती वेदना अजायत। ___(vii)___.ज्वरः अपि जातः। ___(viii)___.अहं पञ्चदिनानि यावत् आक्रान्तः अतिष्ठम्। इदानीं स्वस्थोऽस्मि, ___(ix)___. न करणीया। आशासे, कदाचित्___(x)___. वर्षे भगवत्कृपया ईदृशी दयनीया स्थितिः न स्यात्।

भवदीयः प्रियपुत्रः


क, ख, ग

मञ्जूषा -- अशक्नवम्, चिन्ता, रात्रौ, परमाराध्येषु, अग्रिमे, अहमत्र, ज्वरेण, शिरसि, भगवन्तं, लिख्यते

4 . अधःप्रदत्तम् चित्रम् आधृत्य मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत। 10

**मंजूषा**

**वायुयानम्, द्वे चक्रे, वायुयानस्य चालकः, तिष्ठति, आकाशे उड्डयति, अतिविशालम्, वायुयानेन, जनाः, भूमौ**



अथवा

'जलप्रदूषणम्' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च संस्कृतवाक्यानि लिखत। 10

मञ्जूषा

मलिनजलं, क्षिपन्ति, पीत्वा, प्रदूषणं, क्षालयन्ति, अवकरं, शुद्धजलं, स्वास्थ्यवर्धकं, वस्त्राणि, रुग्णाः

खण्डः 'ग'

अनुप्रयुक्तवाक्यकरणम् ( 30 अङ्काः )

5 अधोलिखितेषु वाक्येषु रेखांकितपदेषु सन्धिच्छेदम् अथवा सन्धिं कृत्वा लिखत। 4

(i) तत्र पावकः ज्वलति।

(ii) अधुना वागीशः विद्यालयम् गच्छति।

(iii) छात्राः गुरुम्+वन्दन्ते।

(iv) एषः नद्याः+तटे भ्रमति।

6 अधोलिखितेषु वाक्येषु रेखांकितपदेषु समासं विग्रहं वा कृत्वा लिखत - 5

(i) पीतानि अम्बराणि यस्य सः अर्जुनस्य सारथिः आसीत्।

(अ) पिताम्बरः (स) पीताम्बरः

(ब) पीताम्बरम् (द) पीतामबरः

(ii) माता च पिता च नगरं गच्छतः।

(अ) मातापिता (स) पिता

(ब) मातेपिते (द) मातापितरौ

(iii) सः यथासमयम् कार्यालयं आगच्छति।

(अ) समय अनुसारं (स) समयेन सह

(ब) समयात् अनतिक्रम्य (द) समयम् अनतिक्रम्य

(iv) दशाननः लंकायाः अधिपतिः आसीत्।

(अ) दशानि आननानि यस्य सः (स) दशं आननानि

(ब) दश आननानि यस्य सः (द) दश आननानि यस्मै सः

(v) हरिद्वारम् गङ्गायाः समीपम् अस्ति।

(अ) गङ्गातटे (स) उपगङ्गा

(ब) उपगङ्गम्　　　　(द) सगङ्गा

7 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 5

(i) गम्+शतृ ________ यानानि धूम्रं क्षिपन्ति।
　(अ) गच्छन्　　(ब) गच्छन्ती
　(स) गच्छन्तौ　　(द) गच्छन्ति

(ii) परिधानवस्त्राणि लभ्+शानच् ________ बालिका मोदते।
　(अ) लभमानः　　(ब) लभमाना
　(स) लभमानम्　　(द) लभमानस्य

(iii). गुरोः गुरुत्वं ________ वर्णयितुं न शक्यते।
　(अ) गुरुत्+त्व　　(ब) गुरुत्व+तल्
　(स) गुरु+त्व　　(द) गुरुत्व+त्व

(iv) परतन्त्रता तु ________ सर्वेभ्यः अभिशापः भवति।
　(अ) परतन्त्र+तल्　　(ब) परतन्त्रत्व+तल्
　(स) परतन्त्रता+तल्　　(द) परतन्त्र+आ

(v) एतेषां दर्शनाय सम्पूर्णा व्यवस्था अस्ति।
　(अ) सम्पूर्ण+आ　　(ब) सम्पूर्ण+डाप्
　(स) सम्+पूर+टाप्　　(द) सम्पूर्ण+टाप्

8 अधोलिखित वाक्येषु रिक्त स्थानानि मञ्जूषायां प्रदत्त-अव्ययपदैः पूरयित्वा वाक्यानि पुनर्लिखत। 5

(i) नगरात् ________ नद्यौ वहतः।
(ii) ________ परिश्रमं न करिष्यसि तावत् सफलः न भविष्यसि।
(iii) ________ मृषा मा वद।
(iv) 'दीयतां तत् धनम्', ________ तेन उक्तम्।
(v) त्वम् ________ आगच्छः ?

मञ्जूषा - कुतः, बहिः, कदापि, इति, यावत्

9 अधोलिखितवाक्येषु अङ्कानां संस्कृतसंख्यावाचकशब्दानां वा उचितपदैः रिक्तस्थानपूर्तिं कुरुत। 5

(i) पुरुषार्थाः (चतुर्) ________ सन्ति।

(ii) वित्तस्य (त्रि) ________ गतय: भवन्ति।

(iii) ब्रह्मण: आयु: (100) ________ वर्षाणि।

(iv) हस्ते (पञ्चन्) ________ अङ्गुल्य: भवन्ति।

(v) मासे (द्वि)________ पक्षौ भवत:।

10 अधोलिखितवाक्येषु रेखाङ्कितपदानां स्थाने प्रदत्तविकल्पेभ्य: शुद्धं पदं चित्वा लिखत। 6

(i) तौ श्व: विद्यालयं न <u>अगच्छताम्</u>।

(अ) अगच्छन् (ब) गमिष्यत:

(स) आगच्छताम् (द) गमिष्यति

(ii) <u>सिंहा</u> वने वसति।

(अ) सिंह: (ब) सिंहम्

(स) सिंहेन (द) सिंहेभ्य:

(iii) <u>अहं</u> प्रतिदिनं व्यायामं करोति।

(अ) वयं (ब) त्वम्

(स) स: (द) तेन

(iv) उद्याने <u>वृक्ष:</u> सन्ति।

(अ) वृक्षौ (ब) वृक्षेण

(स) वृक्षम् (द) वृक्षा:

(v) प्रिया मम <u>मित्र:</u> अस्ति।

(अ) मित्राणि (ब) मित्रम्

(स) मित्रे (द) मित्रा:

(vi) अद्य रविवासर: अस्ति ह्य: च शनिवासर: <u>भविष्यति</u>।

(अ) आसीत् (ब) अस्ति

(स) आसन्  (द) भविष्यसि

## खण्डः 'घ'

## पठित-अवबोधनम् ( 30 अङ्काः )

11 अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत। 4

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तैनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमां चित्रानक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चैत्रः' भवति।

(I) **एकपदेन उत्तरत।**

केषाम् नामानि नक्षत्रसम्बद्धानि ?

(II) **पूर्णवाक्येन उत्तरत।**

मासस्य नाम चैत्रः कथं भवति ?

(III) **निर्देशानुसारम् उत्तरत-**

(i) 'अभिधानम्' इत्यस्य पदस्य कः पर्यायः अत्र प्रयुक्तः ?

(क) नाम्ना  (ख) नामभिः

(ग) नाम  (घ) नामानि

(ii) अत्र 'भवति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(क) सूर्यः  (ख) अवधिः

(ग) उत्तरायणम्  (घ) चैत्रः

12 अधोलिखितान् पद्यांशान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत। 4

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

I. एकपदेन उत्तरत।

वाचि किं भवेत्?

II. पूर्णवाक्येन उत्तरत।

महात्मानः समत्वं कम् आहुः?

III. निर्देशानुसारम् उत्तरत-

(i) 'आहुः' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

| | | | |
|---|---|---|---|
| (अ) | महात्मानः | (ब) | चित्ते |
| (स) | समत्वम् | (द) | अवक्रता |

(ii) 'तदेवाहुः' इति अत्र 'तत्' पदं कस्मै प्रयुक्तम्?

| | | | |
|---|---|---|---|
| (अ) | चित्ताय | (ब) | वाचे |
| (स) | महात्मभ्यः | (द) | अवक्रतायै |

13 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत। 4

पर्यटनाधिकारी – 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।

शोभा – वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः।

पर्यटनाधिकारी – मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः। पश्यत एतत् चित्रम्।

सजीव – किम् एतत् कस्यचित् दुर्गस्य चित्रम्?

पर्यटनाधिकारी – आम्! एतत् दिवांग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः परिचायकाः। अधुना इदं चित्रं पश्यत।

I एकपदेन उत्तरत।

अरुणाचलस्य विशिष्टः राजपशुः कः?

II पूर्णवाक्येन उत्तरत।

कस्य अवशेषाः आर्यकला-संस्कृति-सम्पदः परिचायकाः?

III निर्देशानुसारम् उत्तरत।

Printing error (i) "विशेषः प्रबन्धः आपि अस्ति" अत्र किं विशेषणम्?

(अ) अपि (ब) प्रबन्धः

(स) विशेषः (द) दर्शनाय

(ii) 'पश्यत' इति क्रियापदस्य कर्तृपदं किम्?

(अ) छात्राः (ब) यूयम्

(स) वयम् (द) त्वम्

14 अधोलिखितस्य कथनस्य समुचितं भावं प्रदत्त-विकल्पेभ्यः चित्वा उत्तरपुस्तिकायां लिखत। 2

(क) समाः द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति।

(i) यत्र ब्रह्मशिरः अस्त्रं परम-अस्त्रेण वध्यते मेघाः द्वादश मासाः तद् राष्ट्रं न वर्षन्ति।

(ii) यत्र ब्रह्मशिरः अस्त्रं परम-अस्त्रेण नश्यते मेघाः द्वादश वर्षाणि यावत् तद् राष्ट्रं न अभिवर्षन्ति।

(iii) यत्र ब्रह्मशिरः अस्त्रं परम-अस्त्रेण रुध्यते पर्जन्यः सर्वदा तद् राष्ट्रं वर्षन्ति।

(iv) यत्र मेघाः न सन्ति तत्र वर्षा न भवति।

(ख) इदं अपाण्डवाय।

बाणं मुञ्चन् अश्वत्थामा कथयति यत् -

(i) इदं शस्त्रम् अपाण्डवेभ्यः अस्ति।

(ii) इदं ब्रह्मास्त्रं पाण्डवानां विनाशाय भवतु।

(iii) इदं शस्त्रं पाण्डवपुत्राणाम् कल्याणाय अस्ति।

(iv) इदं शस्त्रं कौरवाणाम् उपकाराय अस्ति।

15 अधोलिखितश्लोकस्य अन्वयं मञ्जूषायाः उचितपदैः पूरयत। 4

षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः।

यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः।।

अन्वयः - यः __(i)__ द्वादश-अक्षस्य __(ii)__ पर्वणः त्रिषष्टिशत- __(iii)__ अर्थम् __(iv)__ सः परः कविः (अस्ति)।

मञ्जूषा

वेद, अरस्य, षण्णाभेः, चतुर्विंशतिः

16 अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 5

(i) काकः <u>प्रभाते</u> सुप्तान् प्रबोधयति।

(ii) मयूरस्य पिच्छानाम् <u>अपूर्व</u> सौन्दर्यं वर्तते।

(iii) अनृतं वदसि चेत् <u>काकः</u> दशेत्।

(iv) <u>सर्वेषाम्</u> महत्त्वं यथासमयम्।

(v) <u>मयूरस्य</u> केकारवं श्रुत्वा कोकिलः अपि लज्जते।

17 अधोलिखितवाक्यानि कथाक्रमेण पुनः लिखत। 4

(i) दुष्टबुद्धिः झटिति अश्वत्थतरुमूलं गत्वा खनति, सुवर्णकलशं च प्राप्नोति।

(ii) दुष्टबुद्धिः प्रच्छन्नभाग्यस्य एव गृहं चौर्यार्थं प्राप्तः।

(iii) क्षेत्रे पिप्पलवृक्षस्य अधः सुवर्णपूरितः कलशः विद्यते।

(iv) कलशे च भयङ्करः सर्पः आसीत्।

(v) रात्रौ प्रच्छन्नभाग्यः स्वपत्नीं स्वप्नं वर्णयति।

(vi) पातनसमये एव कलशात् निष्क्रम्य सर्पः दुष्टबुद्धिम् एव दशति।

(vii) विरक्ता पत्नी अवदत्-वयं परद्रव्यं न इच्छामः, स्वपिहि।

(viii) शीघ्रं कलशम् आवृत्य सः प्रच्छन्नभाग्यस्य गृहे कलशं पातयति।

18 रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत। 3

Exactly meaning of the underlined word -? from the options.

(i). वीरजननी त्वं शोचितुं न अर्हसि।

(अ) वीरपुत्राणां माता (ब) साहसी माता

(स) वीरपुत्राणां सेविका (द) बलवती अम्बा

(ii) अहम् इतः न गमिष्यामि।

(अ) अत्र (ब) तत्र

(स) अस्मात् स्थानात् (द) तस्मात् स्थानात्

(iii) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष।

(अ) विशिष्टोपायम् (ब) क्षत्रियकर्त्तव्यम्

(स) आपद्धर्मम् (द) सैन्यप्रयोगम्

-o0o0o0o-